**अद्मनि** पु० अत्ति सर्व्वान् अद–मनिन् । अग्नौ ।

**अद्मर** त्रि० अद–कर्त्तरि क्मरच् । भक्षणशीले ।

**अद्य** अव्य० अस्मिन्नहनि इदम्शब्दस्य निपातः सप्तम्यर्थे । अस्मिन् दिवसे । “कृष्ण ! त्वदीयपदपङ्कजपिञ्जरान्ते अद्यैव मे विशतु मानसराजहंस इत्युद्भटः । अद्यत्वे इत्यादिभाष्यप्रयोगात् तद्वृत्तावपि अस्य बोधकता । तेनाधारार्थत्वेऽपि अस्य समासान्तरघटकता “अद्यदिनमारभ्य इति” “अद्यप्रभृत्यवनताङ्गीति” कुमारः । एवञ्च वर्त्तमाने काले वर्त्तमानकालवृत्तौ च वृत्तिः “अद्यावधि भवद्भ्यो भिन्नोऽहमिति” वेणी० ।

**अद्यतन** त्रि०अद्य भवः अद्य+ट्यु तुडागमश्च । अद्यभवे वस्तुमात्रे । स्त्रियामद्यतनी । अद्यतनश्च अतीतो भविष्यन्श्चेति द्विधा । तत्र अद्यतनभूते लुङ् अपाक्षीत् । अद्यतनभविष्यति लृट् । पक्ष्यति । अनद्यतनभूते तु लङ्–अपचत् अनद्यतने भविष्यति लुट् पक्ता । [इत्त्विते वर्त्तमानत्वे ।

**अद्यत्व** न० अद्य तद्वृत्तेर्भावः अद्य+त्व । एतर्हिन वस-

**अद्यश्वीना** स्त्री अद्य श्वः परदिने वा प्रसोष्यते अद्य–श्वस्+ख टिलोपः । आसन्नप्रसवायां प्रौढगर्भिण्याम् । “अद्यश्वीनावष्टब्धे” इति पा० ।

**अद्रव** पु० अभावार्थे न०त० । द्रवाभावे । न०ब० । द्रवशून्ये त्रि० “अद्रवं मूर्त्तिमत् स्वाङ्गं प्राणिस्थमविकारजमिति” महाभाष्य० ।

**अद्रव्य** न० अप्राशस्त्ये न०त० । अप्रशस्तद्रव्ये अयोग्यपदार्थे “नाद्रव्ये निहिता काचित् क्रिया फलवती भवेदिति”

**अद्रि** पु० अद–क्रिन् । पर्व्वते, तदवयवे प्रस्तरे ग्रावणि । वृक्षे, सूर्य्ये, मेघे, परिमाणभेदे च तद्भेदश्च परिमाणशब्दे वक्ष्यते तत्र ग्रावणि, अद्रिषुतः, मेघे ‘अद्रिमाता, पर्वते, दुहितरमनुकम्प्यामद्रिरादाय दोर्भ्यामिति” कुमा० ।

**अद्रिकर्णी** स्त्री अद्रिः अद्रिनामिका गिरिर्बालमूषिका तस्याः कर्णः कर्णतुल्यं पुष्पान्तःस्थं पत्रं यस्याः गौरादित्वात् ङीष् । बालमूषिकाकर्णतुल्यपुष्पाभ्यन्तरपत्रायां अपराजितायाम् ।

**अद्रिकीला** स्त्री अद्रयः कुलाचलाः पर्वताः कीलाः शङ्कव इव यस्याः ब० । पृथिव्याम् । अद्रेः सुमेरोः कील इव वा । विष्कुम्भपर्व्वते पु० । तद्विवरणं अचलकीलाशब्दे दृश्यम् ।

**अद्रिज** न० अद्रौ जायते जन–ड ७त० । (शिलाजतु) इति ख्यातनामप्रसिद्धे गन्धद्रव्ये । (गेरि) इति प्रसिद्धे उपधाताविति केचित् । पार्व्वत्यां स्त्री । पर्व्वतभवमात्रे त्रि० । सैंहलीवृक्षे स्त्री राजनि० । अद्रिजातादयोऽप्युक्तार्थेषु पर्वतजाते दवानले, सूर्य्यजे हंसे, रूपे आत्मनि च पु० ।

**अद्रितनया** स्त्री ६त० । पार्व्वत्यां तद्व्युत्पत्तिः अचलकन्याशब्दे द्रष्टव्या अद्रिसुतादयोऽप्यत्र । “अद्रिसुतासमागमोत्क” इति कुमा० ।

**अद्रिद्विष्** पु० अद्रिभ्यः द्वेष्टि द्विष–क्विप् । इन्द्रे । तस्य तद्द्वेष्टृत्वं गोत्रभिच्छब्दे दृश्यम् ।

**अद्रिदुग्ध** पु० अद्रिभिर्ग्रावभिर्दुग्धः अभिषुतः ३त० । ग्रावाभिषुते सोमे, “तिरो रोम पवते अद्रिदुग्ध” इति ऋ० । ६, ९७, ११, “अद्रिदुग्धः ग्रावाभिषुत” इति भा० ।

**अद्रिद्रोणि** स्त्री अद्रेर्द्रोणिरिव । पर्वतभवनद्याम् “अद्रिद्रोणीरनपसारमार्गा” इति दश० ।

**अद्रिपति** पु० ६त० । हिमाचले तद्विवरणम् अचलराजशब्दे ।

**अद्रिबर्हस्** त्रि० अद्रेर्बर्ह इव बर्होऽस्य । अद्रिसारे अतिकठिने “पीयूषं द्यौरदितिरद्रिबर्हाः” इति ऋ० १०, ६३, ३ ।

**अद्रिबुध्न** पु० उपमा० ब० । अतिकठिने । “अयं निधिः सरमे अद्रिबुध्न इति” ऋ० १०, १०८, ७, ।

**अद्रिभिद्** पु० अद्रिं भिनत्ति भिद–क्विप् ६त० । इन्द्रे । गोत्रभिच्छब्दे तद्भेदेन विवरणम् ।

**अद्रिभू** स्त्री अद्रावपि भवति भू–क्विप् ७त० । अपराजिता लतायाम् तस्याः पर्वतेऽप्यतिकठोरभूमिके जायमानत्वात्तथात्वम् । पार्वत्यां स्त्री । पर्वतजातमात्रे त्रि० ।

**अद्रिमातृ** पु० अद्रिर्मेघस्तज्जलं मिमीते मा–तृच् । मेघजलनिर्मातरि ‘स्वर्वित् कोशं दिवो अद्रिमातरमिति’ ऋ० ९, ८६, ३ ।

**अद्रिराज** पु० अद्रीणां राजा टच्समा० । हिमाचले । अद्रिषु राजते क्विप् अद्रिराडप्यत्रैव पु० । विवरणमचलराजशब्दे ।

**अद्रिषुत** पु० अद्रिभिः ग्रावभिः सुतः अभिषुतः ३त० षत्वम् । ग्रावाभिषुते सोमे । “वृधतो अद्रिषुतो बर्हिषीति” ऋ० ९, ७२, ४ अद्रिषुतः ग्रावभिरभिषुत इति भाष्यम् ।

**अद्रिसंहत** पु० अद्रिभिः संहतम् अभिषुतम् । ग्रावाभिषुते सोमे “स्वसारो अद्रिसंहताविति” ऋ० ९, ९८, ६, अद्रिरिव संहतः कठिनः । अतिकठिने त्रि० ।

**अद्रिसार** पु० अद्रेः सार इव । लौहे । अद्रेरिव सारोऽस्य अतिकठिने त्रि० ।

**अद्रिसारमय** त्रि० अद्रिसारात्मकः । अत्यन्तकठिने ।